दैनिकम् ई-संस्कृतवार्तापत्रम्

# हिमसंस्कृतवार्ता

पञ्चाङ्गम्
वि.सं. २०८३,
कलियुगाब्धः ५१२७ शरद्-ऋतुः
सूर्यः दक्षिणायनम् आश्विन् कृष्णतृतीया
आश्विन् 13 प्रविष्टांशः मङ्गलमयः भवेत्

■ पृष्ठ-09 ■ वर्ष-5 ■ अङ्क-340 | 1 | सितम्बर 29, 2026 | Website- www.himsanskritam.com | Email-himsanskrit@gmail.com



2 देशे शताधिक-कोटितोऽप्यधिकेभ्यः जनेभ्यः विविध-योजनानां माध्यमेन सामाजिक-सुरक्षायाः लाभः प्रदीयते - डा. मनसुख माण्डविया

4 एसआईआर (SIR) विवादे चिराग-पाशवानस्य विपक्षं प्रति प्रश्नः- यदि निर्वाचन-आयोगे विश्वासो नास्ति तर्हि कांग्रेस-दलस्य विजयः सर्वकाराश्च कथं रचिताः?

8 हिमाचलप्रदेशस्य नामकरणकर्तुः आचार्यदिवाकरदत्तशर्मणः जयन्तीदिने कृतज्ञसमाजेन कृतं भावपूर्णं स्मरणम्


## यूपीआई-व्यवहारेषु एमडीआर-शुल्क-प्रवर्तनस्य केन्द्रसर्वकारस्य निर्णये सर्वोच्चन्यायालयेन स्थगनादेशः अस्वीकृतः




सर्वोच्चन्यायालयेन आगामि-मासस्य पञ्चदश-दिनाङ्कतः प्रवर्तमानेषु द्विसहस्राधिक-रूप्यकाणां निर्दिष्ट-व्यक्तितः व्यापारी यूपीआई-व्यवहारेषु एमडीआर इति शुल्क-प्रवर्तनस्य केन्द्र-सर्वकारस्य निर्णये स्थगनादेशे असम्मतिः प्रदर्शिता । न्यायमूर्तेः सूर्यकान्तस्य, न्यायमूर्तेः जयमाल्य-बागचिनः अथ न्यायमूर्तेः वी. मोहनस्य च पीठेन केन्द्र-सर्वकाराय, भारतीय-रिजर्व-बैंक इत्यस्मै अन्येभ्यश्च प्रतिवादिभ्यः सूचना-पत्रं प्रेषयित्वा चतुर्षु सप्ताहेषु प्रत्युत्तरं समर्पयितुं निर्दिष्टम्। केन्द्रस्य पक्षं स्थापयता अतिरिक्त-महान्याय-अभिकर्त्रा एन. वेङ्कटरमणेन उक्तं यत् पेमेंट गेटवे इत्यस्य षण्णवति-प्रतिशतं प्रयोक्तारः अस्मात् शुल्कात् मुक्ताः एव स्थास्यन्ति। इयं जनहित याचिका अधिवक्ता-अञ्जन-दत्तेन उपस्थापिता आसीत्।

## भारतेन पाकिस्तानस्थेषु आतङ्क्याश्रयेषु विहितस्य सर्जिकल-सट्राइक इत्यस्य दशमी वार्षिकी आमान्यते



भारतेन सर्जिकल-स्ट्राइक इत्यस्य दशमी वार्षिकी मानिता, येन प्रहारेण विश्वस्य पुरतः नरेन्द्रमोदी-सर्वकारस्य आतङ्कवाद-विरोधि-नीतेः कश्चन नूतनः प्रभावकारी च दृष्टान्तः उपस्थापितः आसीत्। षोडशाधिक-द्विसहस्रतमस्य सितम्बर-मासस्य अष्टाविंशति-एकोनत्रिंशत्-दिनाङ्कयोः रात्रौ भारतीय-सेनया पाक-अधिकृत-जम्मू-काश्मीरे नियन्त्रण-रेखायाः पारस्थितेषु आतङ्कवादिनां प्रस्थान-केन्द्रेषु लक्ष्य-केन्द्रितः प्रहारः विहितः। एतत् सैन्याभियानं तस्मिन्नेव मासे उरी-सैन्य-शिविरे सञ्जातस्य आतङ्की-आक्रमणस्य प्रत्युत्तरम् आसीत्, यस्मिन् एकोनविंशतिः भारतीय सैनिकाः वीरगतिं अवाप्नुवन् । इयं वार्षिकी राष्ट्रियसुरक्षा-तन्त्रे विगतदशके आगतानां दृढ-परिवर्तनानां द्योतिका वर्तते। मन-की-बात इत्याख्ये कार्यक्रमे प्रधानमन्त्री नरेन्द्रमोदी षोडशाधिक-द्विसहस्रतमस्य एतत् अभियानम् कीर्तिस्तम्भात्मकमिति न्यरूपयत्। सः अवोचत् यत् अनेन अभियानेन नियन्त्रणरेखायाः पारे साहसिक-अभियानसञ्चालने भारतीय-सेनायाः अद्वितीयं सामर्थ्यं विश्वपटले प्रतिष्ठापितम्। प्रधानमन्त्रिणा प्रतिपादितं यत् विगतदशके भारतस्य आतङ्कवाद-विरोधि-नीतिः निरन्तरं सुदृढा विवृद्धा च सञ्जाता एतदर्थं तेन बालाकोट-वैमानिक-प्रहारः अथ सिन्दूराभियानम् प्रमुखोदाहरण-रूपेण उदाहृतम् ।

## भाजपादलेन विपक्षिदलं राष्ट्रस्य स्वायत्तसंवैधानिकसंस्थानां कलङ्कीकरणस्य तासां च दुर्बलीकरणस्य प्रयासमालक्ष्य कट्वालोचितम्



भाजपादलेन विपक्षिदलं राष्ट्रस्य स्वायत्तसंवैधानिकसंस्थानां कलङ्कीकरणस्य तासां च दुर्बलीकरणस्य प्रयासमालक्ष्य कट्वालोचितम्। नवदेहल्यां वार्ताहरैः सह वार्तावधौ वरिष्ठभाजपानेता केन्द्रीयमन्त्री च जगत्प्रकाशनड्डा विपक्षनेतृन् जनान् भ्रमयितुं देशे च भ्रान्तिं जनयितुं प्रयतमानान् इति आरोपितवान्। सः आरोपितवान् यत् निर्वाचनायोगेन तेषां कथनानि निरस्तीकृतानि सन्ति, तथापि विपक्षिदलानि वातावरणं विषमयन्ति। सः इदमपि आरोपितवान् यत् तेषाम् एकमात्रम् उद्देश्यम् शासनप्राप्तिः, वंशपरम्परागत-राजनीतेः पोषणं निजलाभानां च प्राप्तिः अस्ति, जनसेवा तु नास्ति।

## अद्यतनीयं सुभाषितम्

**अहो बत विचित्राणि चरितानि महात्मनाम्।
लक्ष्मी तृणाय मन्यन्ते तद्भारेण नमन्ति च।।**

भावार्थः- अहो! महान संत महात्मों की जीवन शैली भी कितनी विचित्र होती है? वे धन संपत्ति को एक तिनके के समान तुच्छ समझते हैं और धनवान होने पर उसके भार स्वरूप (गर्वित न हो कर) विनम्र ही बने रहते हैं।


हिमसंस्कृतवार्तापत्रस्य एकवर्षस्य सदस्यता १००₹
One year subscription to the daily Sanskrit newspaper is Only 100 Rupees
To subscribe, text us a message saying hello on the number below.
7876636263
कार्यालयः, हिमसंस्कृतम्, प्रकाशनम्
जसवां कोटला तहसीलपरिसरस्य सम्मुखे कस्बा कोटला जिला कांगड़ा हि.प्र.
पत्रव्यवाहरसङ्केतः-१७७१११ कार्यालीयः सम्पर्कः- शिवानी शर्मा 7876636263
सूचना- हिमसंस्कृतवार्ताः दैनिकपत्रे व्याकरणात्मक-अशुध्दीनां कृते, राजनैतिक-सांस्कृतिकविचाराणाञ्च कृते सम्बद्धाः पत्रकाराः लेखकाश्च उत्तरदायिनः भविष्यन्ति
संपादकगणः- डॉ.अमनदीपशर्मा, डॉ.मनोज शैलः, डॉ.अमित शर्मा, डॉ.नरेन्द्रराणा,
प्रचारगणः- जगदीश डाभी, शिवा शर्मा, वत्सदेसराजः, डॉ.पद्मनाभः, डॉ.अभिषेकशर्मा


## राष्ट्रेण स्वातन्त्र्य-सेनानी शहीद भगतसिंहः तस्य जयन्त्यवसरे संस्मर्यते



राष्ट्रम् क्रान्तिवीरस्य स्वातन्त्र्यसेनानिनः भगतसिंहस्य एकोनविंशत्यधिकैकशत-तमे जन्मजयन्त्यवसरे तं श्रद्धया स्मरितवान्। सप्ताधिक-नवदश-शततमे वर्षे अस्मिन् एव दिवसे भगतसिंहस्य जन्म पञ्जाबप्रान्तस्य लायलपुरजनपदस्थे वङ्गाग्रामे अभवत्, यत् अधुना पाकिस्तानदेशे अस्ति। शहीद-ए-आज़म इति उपाधिना प्रख्यातः भगतसिंहः ब्रिटिशशासनस्य विरुद्धं सङ्घर्षस्य प्रेरणा तस्य परिवारस्य स्वातन्त्र्यसङ्ग्रामे सक्रियसहभागितया प्राप्तवान्। तस्य पितामहः पिता पितृव्याश्च स्वातन्त्र्यसङ्ग्रामे सक्रियतया भागं गृहीतवन्तः। भगतसिंहः ब्रिटिशशासनं विरुध्य स्वातन्त्र्यान्दोलने सक्रियतया सम्मिलितः अभवत् तथा पूर्णस्वातन्त्र्याय समर्थनं कृतवान्। भगतसिंहस्य साहसेन युवजनाः प्रेरिताः अथ भारतस्य स्वातन्त्र्यसङ्ग्रामाय च नूतना गतिः प्राप्ता।

# देशे शताधिक-कोटितोऽप्यधिकेभ्यः जनेभ्यः विविध-योजनानां माध्यमेन सामाजिक-सुरक्षायाः लाभः प्रदीयते - डा. मनसुख माण्डविया



केन्द्रीय-श्रमोद्योग-मन्त्रिणा डा. मनसुख माण्डविया इत्यमुना उक्तं यत् देशे शताधिक-कोटितोऽप्यधिकेभ्यः जनेभ्यः विविध-योजनानां माध्यमेन सामाजिक-सुरक्षायाः लाभः प्रदीयते। अत्र षष्टि-कोट्यधिकेभ्यः नागरिकेभ्यः पञ्च-लक्ष-रूप्यकाणां स्वास्थ्य-सुरक्षा कवचम्, पञ्चविंशति-कोटि-जनेभ्यः ईएसआईसी इति श्रमिक-राज्य बीमा निगमस्य स्वास्थ्य-सुरक्षा, अशीत्यधिक-कोटि-जनेभ्यः निःशुल्क-अन्न-वितरणं अथ च कृषकेभ्यः महिलाभ्यश्च वित्तीय-सहायता अन्तर्भवति। मन्त्री महोदयः नवदेहल्याम् औद्योगिक-सम्बन्धाः अथ श्रम-पुरस्काराः इति विषये आयोजितां राष्ट्रिय-सङ्गोष्ठीं सम्बोधयति स्म। डा.माण्डविया न्यरूपयत् यत् राष्ट्रस्य सततोन्नत्यै सर्वकारः उद्योगानां संवर्धन-रक्षणेन सहैव श्रमिकाणां कल्याणेऽपि दृढ-प्रतिज्ञतया कार्यं करोति।

# अंशविपण्याः दैनिकं वृत्तम्

## भूराजनीतिकसंघर्षेण अंशविपण्यां तीव्रतमः ह्रासः, बीएसई सेंसेक्स सूचकांकः ७२७७१.७२, निफ्टी ५० सूचकांकः २२७८०.२५




**हिमसंस्कृतवार्ताः- डॉ विमलेशझा, मुम्बई, २८ सितंबर २०२६।** सोमवासरे भारतीय-अंशविपण्यां तीव्रः पतनः अभवत्। वैश्विकविपणिषु व्याप्तस्य अस्थिरतापूर्णस्य वातावरणस्य, अमेरिका-ईरानयोः वार्तायां गतिरोधस्य, अपरिष्कृततैलस्य मूल्यवृद्धेः प्रभावः भारतीयविपण्यां स्पष्टतया दृष्टः। अमेरिकीयराष्ट्रपतिना डोनाल्ड ट्रम्पमहोदयेन ईरानस्य प्रस्तावितः सप्तदिवसीयः युद्धविरामप्रस्तावः अस्वीकृतः इति समाचारानन्तरं होर्मुजसामुद्रधुनेः माध्यमेन तैल-आपूर्तेः विषये चिन्ता वर्धिता। फलतः ब्रेन्ट्अपरिष्कृततैलस्य मूल्यं प्रायः १०६.७ अमेरिकी-डॉलर् प्रति बैरल इति अभवत्। भारतदेशः अपरिष्कृततैलस्य प्रमुखः आयातकःअस्ति, एतस्मात् कारणात् मूल्यवृद्धिः आयातव्ययं, मुद्रास्फीतिं तथा उद्योगानां लाभांशं अत्र प्रभाविताः भविष्यन्ति। बीएसईसेन्सेक्सः १.५२ प्रतिशतं अर्थात् १,१२४.०२ अङ्कैः पतित्वा ७२,७७१.७२ अङ्केषु अवरुद्धः जातः। निफ्टी-५० अपि १.५६ प्रतिशतं अर्थात् ३६०.२५ अङ्कैः पतित्वा २२,७८०.२५ अङ्केषु स्थिरः अभवत्। विपण्याः अस्य पतनस्य पृष्ठभूमौ विदेशीय-संस्थागत- निवेशकानां विक्रयः, वर्धमानं अपरिष्कृततैलमूल्यं, वैश्विक-भूराजनीतिकसंघर्षः, अमेरिकीबन्धकप्रतिफलस्य वृद्धिः प्रमुखाः कारकाः सन्ति।

# एशियन-क्रीडा-प्रतिस्पर्धासु भारतेन स्वपदक-तालिकायां पञ्च नूतनानि पदकानि योजितानि, भारतीय- पुरुष-क्रिकेट्-दलं च उपान्त्य-चक्रे प्रविष्टवत्



हिमसंस्कृतवार्ता। जापानदेशस्य आइचि-नागोयानगरे आयोज्यमानासु एशियाक्रीडासु भारतस्य पदकप्रातिक्रमः अधुनापि अनुवर्तते। लक्ष्यवेधनस्पर्धा, क्रिकेट, कुराश्, मुष्टियुद्धम् इत्यादिषु क्रीडासु भारतीयक्रीडकैः पदकानि प्राप्तानि। भारतस्य पदकसङ्ख्यायां पञ्चपदकानि अधिकानि योजितानि। भारतीयपुरुष-क्रिकेट्-दलमपि उपान्त्यचक्रे प्रविष्टम्। धावकः गुलवीरसिंहः पुरुषाणां पञ्चदश-शतमीटर्-मितायां धावनस्पर्धायां द्वितीयं स्थानं प्राप्य अस्मिन् क्रीडामहोत्सवे स्वस्य द्वितीयं रजतपदकं प्राप्तवान्। लक्ष्यवेधनक्रीडायां ईशासिंह इत्यनया महिलानां पञ्चविंशति-मीटर्-भुशुण्डिका-स्पर्धायां रजतपदकं प्राप्तम्। एकविंशतिवर्षीया भारतीयक्रीडिका अष्टत्रिंशदङ्कान् प्राप्य द्वितीयस्थाने स्थिता।
पारुलचौधरी अस्मिन् क्रीडामहोत्सवे स्वस्य द्वितीयं कांस्यपदकं प्राप्तवती। भारतेन कुराश्-क्रीडायामपि कांस्यपदकं प्राप्तम्। पिङ्की बलहारा महिलानां अष्टसप्तति-किलोग्रामात् न्यूनभारवर्गे तृतीयं स्थानं प्राप्तवती । मुष्टियुद्धे भारतेन त्रीणि अन्यानि पदकानि सुनिश्चितानि सन्ति। लवलीनाबोरगोहेन् प्रियाघनघास् तथा कपिलपोखरिया स्व-स्वभारवर्गेषु उपान्त्यचक्रे प्रविष्टवन्तः। तत्रैव भारतीयपुरुष-क्रिकेट्-दलस्य अफगानिस्तानदलस्य च मध्ये जातम् उपान्त्यचक्रं प्रतिकूलवायुमण्डलीयपरिस्थितिकारणेन स्थगितं जातम्। अनेन भारतं क्रीडाङ्गणे अवतीर्य विना एव उपान्त्यचक्रे प्रविष्टम्।

# विशेष-गहन-पुनरीक्षणम् (SIR) अधिकृत्य विपक्षस्य आरोपाः तथ्यहीनाः निराधाराश्च : मुख्यमन्त्री सम्राट्-चौधरी



**पाटलीपुत्रम् (पटना),**
**हिमसंस्कृतवार्ताः राघव नाथ झा**

मुख्यमन्त्री सम्राट्-चौधरी अवदत् यत् बिहार-राज्ये विशेष-गहन-पुनरीक्षणस्य (SIR) प्रक्रिया निर्वाचन-आयोगेन निर्धारितानां नियमानाम् अनुसारेण पूर्ण-पारदर्शकतया समापिता। सः न्यवेदयत् यत् एसआईआर-प्रक्रियायां कस्यापि योग्य-मतदातुः नाम स्वेच्छया न निष्कासितम्, दावा-आपत्ति-पञ्जीकरणार्थं च सम्पूर्णा व्यवस्था उपलब्धा आसीत्।मुख्यमन्त्रि-सचिवालयस्थे 'संवाद'-प्रकोष्ठे आयोजितायां वार्ताहर-सम्मेलने (प्रेस-वार्तायाम्) मुख्यमन्त्री अवदत् यत् २०२५ तमस्य वर्षस्य जून-मासस्य २४ दिनाङ्कतः जुलाई-मासस्य २५ दिनाङ्कं यावत् प्रचालिते एसआईआर-अभियाने मतदातृ-सूच्याः व्यापकं प्रमाणीकरणं कृतम्। अस्मिन् अवधौ मृतानां व्यक्तीनाम्, स्थायिरूपेण स्थानान्तरितानां मतदातॄणां, तथैव एकाधिक-स्थानेषु अङ्कितानां नाम्नां नियमानुसारं सत्यापनं विहितम्। तेनोक्तं यत् येषां मतदातॄणाम् अर्हता-विषयिणी कापि समस्या आसीत्, तेषां कृते दावा-आपत्ति-प्रस्तुतेः विधिवत् व्यवस्था उपलभ्यते स्म। अनेन सहैव, २००३ तमस्य वर्षस्य मतदातृ-सूची अपि अन्तर्जाल-माध्यमेन (ऑनलाइन) उपलब्धा कृता, येन योग्याः मतदातारः स्वकीयानां पुरातन-विवरणानां प्रमाणीकरणं कर्तुं शक्नुयुः।
मुख्यमन्त्री सुस्पष्टम् अकरोत् यत् सर्वोच्च-न्यायालयस्य निर्देशानुसारम् 'आधार' (Aadhaar) पत्रं केवलं परिचय-पत्ररूपेण स्वीकार्यं वर्तते, किन्तु तत् नागरिकतायाः प्रमाणं न मन्यते। सः अवदत् यत् यदि कस्यापि योग्य-जनस्य नाम मतदातृ-सूच्यां नास्ति अथवा कापि यथार्था समस्या वर्तते, तर्हि तस्य निवारणार्थं निर्वाचन-आयोगः न्यायव्यवस्था च उभयमेव उपलब्धे स्तः। विपक्षाय आह्वानं कुर्वन् मुख्यमन्त्री अवदत् यत् लोकतन्त्रे असहमतेः अधिकारः सर्वेषां कृते वर्तते, परन्तु आरोपाः तथ्यैः प्रमाणैश्च सहैव प्रस्तोतव्याः। सः निर्वाचन-आयोगं न्यायपालिकां च लोकतान्त्रिक-व्यवस्थायाः महत्त्वपूर्णाः विश्वसनीयाश्च संस्थाः प्रतिपादितवान्।विकास-विषये मुख्यमन्त्री अकथयत् यत् प्रधानमन्त्रिणः नरेन्द्र-मोदिनः नेतृत्वे देशे विकासस्य गतिः तीव्रा सञ्जाता, केन्द्र-राज्य-सर्वकारयोः योजनानां लाभश्च निर्धनेभ्यः वञ्चितेभ्यश्च परिवारेभ्यः प्राप्यते।

# "छठ-महापर्व भारतस्य महत्त्वपूर्णा अमूर्त- सांस्कृतिक- धरोहरः"- राज्यसभोपसभापतिः हरिवंशः



## इन्टाच (INTACH) संस्थायाः 'अर्घ्य' प्रदर्शनी यूनेस्को-संस्थायाः अमूर्त- सांस्कृतिक-विरासत- सूच्यां छठपर्वणः समावेशाय महत्त्वपूर्णः उपक्रमः।

**हिमसंस्कृतवार्ताः राघव नाथ झा, नवदेहली।**
भारतीय- राष्ट्रीय- कला- संस्कृति- विरासत-न्यासेन नवदेहल्याम् आयोजितायाः 'अर्घ्य' नामिकायाः प्रदर्शिन्याः समुद्घाटनं कुर्वन् राज्यसभायाः उपसभापतिः हरिवंश-महोदयः अवदत् यत् छठ-महापर्व भारतस्य महत्त्वपूर्णा अमूर्त- सांस्कृतिक- विरासतः वर्तते, सम्प्रति च अस्य वैश्विकः प्रसारः सञ्जातः। छठ-पर्वे भारतस्य सांस्कृतिकचेतना सनातनपरम्परा च साक्षात् परिलक्षिते भवतः।

उपसभापतिः हरिवंशः छठ-सम्बद्धाः स्वकीयाः बाल्यकालीन-स्मृतीः संस्मरन् अकथयत् यत् बाल्यकाले तेनापि छठ-पर्वणः निमित्तं भिक्षाटनं कृतमासीत्। सः न्यवेदयत् यत् छठ-पर्व न केवलम् एका पूजा-पद्धतिः, अपि तु प्रकृतेः प्रति कृतज्ञतायाः, लोकास्थायाः, कठोरानुशासनस्य, सामूहिक-सहभागितायाश्च विशिष्टा भारतीया परम्परा वर्तते। इन्टाच-संस्थायाः अस्य उपक्रमस्य श्लाघां कुर्वन् सः अवदत् यत् 'अर्घ्य' प्रदर्शनी प्रधानमन्त्रिणा छठपर्व यूनेस्को-संस्थायाः अमूर्त-सांस्कृतिक-विरासत-सूच्यां स्थानं प्रापयितुं क्रियमाणं प्रयासम् उपबृहयिष्यति।

इन्टाच-संस्थायाः अध्यक्षः अशोकसिंह-ठाकुरः स्वागतभाषणे अवदत् यत् १९८४ तमे ख्रीष्टाब्दे स्थापितायाः अस्याः संस्थायाः मुख्यं लक्ष्यं भारतस्य मूर्त-अमूर्त-विरासतानां संरक्षणं संवर्धनं च वर्तते। सः अकथयत् यत् 'अर्घ्य' प्रदर्शिन्याः माध्यमेन छठपर्वणः समृद्ध-सांस्कृतिकपरम्परायाः तत्सम्बद्धानां कलाविधानां च कृते विशालः मञ्चः प्रदत्तः अस्ति। कार्यक्रमे इन्टाच-संस्थायाः सदस्यसचिवेन रवीन्द्रसिंहेन धन्यवादज्ञापनं विहितम्। इन्टाच-बिहार-विभागस्य संयोजकः भैरवलालदासः अवदत् यत् छठ-महापर्वम् आधारिकृत्य आयोजिता इयं प्रथमा प्रदर्शनी वर्तते, यस्यां बिहारस्य विविधाः कलाविधाः एकत्र समन्विताः सन्ति। एतासु समकालीन-कला, पटनाकलम, मिथिलाचित्रकला (मधुबनी-पेंटिंग्स), मञ्जूषा, टिकुली, भोजपुरी, सुजनी, क्रोशिया, टेराकोटा (मृत्तिकाशिल्पम्), वैद्यनाथ-चित्रकला च प्रमुखाः सन्ति। सः अवदत् यत् बिहारस्य कलापरम्पराणां विविधतां छठ-पर्वणः सांस्कृतिक- पृष्ठभूमिना सह संयोज्य उपस्थापयितुं कृतोऽयं प्रयासः लोककलायाः लोकपर्वणश्च प्रगाढं सम्बन्धं प्रकटीकरोति।

प्रदर्शिन्याः संरक्षिके मनीषा झा, अलका दास च अकथयताम् यत् प्रदर्शिन्यां त्रिपञ्चाशत् (५३) कलाकाराणां समूहेन प्रायः अष्टसप्ततिः (७८) कलाकृतयः प्रदर्शिताः सन्ति। एतासु कलाकृतिषु छठ-पर्वणः आस्था, लोकजीवनं, बिहारस्य विविधाः कलापरम्पराश्च सुस्पष्टं विराजन्ते।

इन्टाच-संस्थायाः प्रतिनिधिः बिन्दु-मनचन्दा अवदत् यत् देहल्याः कलामर्मज्ञेषु अस्याः प्रदर्शिन्याः दर्शनाय महान् उत्साहः दृश्यते, येन आयोजकाः नितरां प्रसन्नाः सन्ति। कला-सांस्कृतिक- क्षेत्रेण सम्बद्धानां जनानां सक्रिया सहभागिता इमम् उपक्रमं विशिष्टं लावण्यं प्रयच्छति। प्रसिद्धा लोकगायिका कल्पना-पटवारी प्रदर्शिन्याः दर्शनं कुर्वती पारम्परिक-छठ-गीतानि प्रस्तुतवती। सा गीतकारेण हृदयनारायणझा-महोदयेन सार्धं कलाकाराणाम् उत्साहवर्धनम् अकरोत्। तस्याः गीतानां सुमधुरस्वरेण प्रदर्शनी-परिसरे लोकसंस्कृतेः पर्वणश्च भावपूर्णा अनुभूतिः सञ्जाता।

'अर्घ्य' प्रदर्शिन्यां छठ-पर्व न केवलम् एकस्य धार्मिक-उत्सवरूपेण, अपि तु भारतस्य जीवन्त्याः अमूर्त-सांस्कृतिक-विरासतस्य रूपेण साधिकारम् उपस्थापितम्। बिहारस्य लोककलायाः, लोकगीतानि, पारम्परिकशिल्पस्य च माध्यमेन छठ-पर्वणः सांस्कृतिकव्यापकतां राष्ट्रिय-राजधान्यां प्रकाशयितुम् अयं कृतः प्रयासः दर्शकानां विशेष-आकर्षणस्य केन्द्रं सञ्जातः।
इयं प्रदर्शनी अक्तूबर-मासस्य प्रथमां (१) दिनाङ्कं यावत् निरन्तरं प्रचलिष्यति।



# वर्षर्तु-प्रस्थानात् पूर्वं धारासारेण वृष्टिः

## तापमानस्य पातः, उच्च-शिखरेषु हिमपातः

हिमसंस्कृतवार्ताः- शिमला।
हिमाचलप्रदेशात् वर्षर्तु-प्रस्थानात् पूर्वं प्रदेशे मेघाः धारासारेण वर्षन्ति। उपरि-शिमलाक्षेत्रैः सह अन्येषु अनेकेषु भागेषु विगत-द्वि-दिनेभ्यः विरामं विना अनुवृत्ता वृष्टिः प्रचलति। राजधान्यां शिमलायां शनिवासरानन्तरं सोमवासरेऽपि विपुलवृष्टिः अङ्किता। किन्नौर- लाहौल- स्पीति- चम्बा- मण्डलानाम् उच्चशिखरेषु नूतन-हिमपातेन सह शीततुः स्व-उपस्थितिं विज्ञापयत्। आगामिषु चतुर्विंशति-होरासु (२४ घण्टेषु) राज्यस्य अनेकेषु भागेषु अधिकतम-तापमाने ३-४ डिग्री- सेल्सियस- परिमितः पातः सम्भाव्यते। विगत-२४ होरासु काङ्गड़ायां ७३.४, धर्मशालायां ६१.१, किन्नौरस्य साङ्गलायां ४५.६, शिमलायाः सराहां-क्षेत्रे ३८.५, पांवटा-साहिबे ३०.६, कल्पायां ३०.४, जोगिन्द्रनगरे २६.०, भाबानगरे २६.०, मण्ड्यां २१.६, रामपुरे २०.० मिलिमीटर-परिमिता वृष्टिः पञ्जीकृता।

**एतेषु मण्डलेषु षड्-होराः यावत् वृष्टेः सम्भावना**
ऋतु-विज्ञान-केन्द्र-शिमला-अनुसारम् आगामिषु षट्सु होरासु (सायं ५:३० तः रात्रौ ११:३० पर्यन्तम्) शिमला-सोलन-मण्डलाभ्यां सह सिरमौर- मण्डी- कुल्लू- बिलासपुर-किन्नौर-मण्डलानां केषुचित् भागेषु मन्दतः मध्यमा वृष्टिः, एकत्र-द्वयोः स्थानयोः च तीव्र-वृष्टिप्रवाहः सम्भाव्यते। ऋतु- विभागानुसारं २९ सितम्बर दिनाङ्के राज्ये केषुचित् स्थानेषु मन्दतः मध्यमा वृष्टिः उच्चशिखरेषु च हिमपातः प्रवर्तिष्यते। तदनन्तरं ३० सितम्बरतः ४ अक्टूबर् पर्यन्तं समग्रे प्रदेशे ऋतुः स्वच्छः भविष्यति इति पूर्वानुमानं वर्तते। दक्षिण-पश्चिम-वर्षर्तु-प्रत्यावर्तनस्य सीमा गुरदासपुर- चण्डीगढ़- मुजफ्फरनगर- अलीगढ़- धौलपुर- उदयपुर- डीसा- नलिया इति मार्गैः गच्छति।

**वर्षर्तौ १२ प्रतिशतं, सितम्बर-मासे च १९ प्रतिशतं न्यूना वृष्टिः**
हिमाचलप्रदेशे अस्मिन् वर्षे समग्र-वर्षर्तौ सामान्यात् १२ प्रतिशतं, सितम्बर-मासे च १९ प्रतिशतं न्यूना वृष्टिः पञ्जीकृता अस्ति। २० जूनतः २८ सितम्बर दिनाङ्कं यावत् प्रदेशे ६४४ मिलिमीटर- परिमिता वृष्टिः सञ्जाता, यत्र अस्यां कालावधौ ७३२ मिलिमीटर-परिमिता वृष्टिः सामान्या मन्यते। बिलासपुर- किन्नौर- कुल्लू- शिमला- सिरमौर- मण्डलेषु अस्मिन् वर्षर्तौ सामान्यात् अधिका वृष्टिः जाता। अपरत्र चम्बा- हमीरपुर- काङ्गड़ा- लाहौल-स्पीति- मण्डी- सोलन- ऊना- मण्डलेषु सामान्यात् न्यूना वृष्टिः अभवत्। सितम्बरमासे यत्र ११८ मिलिमीटर-वृष्टिः सामान्या मन्यते, तत्र अस्मिन् वारे केवलं ९५ मिलिमीटर-परिमिता वृष्टिः एव अङ्किता।

# एसआईआर (SIR) विवादे चिराग-पाशवानस्य विपक्षं प्रति प्रश्नः- यदि निर्वाचन-आयोगे विश्वासो नास्ति तर्हि कांग्रेस-दलस्य विजयः सर्वकाराश्च कथं रचिताः?



## आयोगस्य स्पष्टीकरणानन्तरम् अवदत् चिरागः- पूर्वं काश्चन चिन्ताः आसन्, अधुना बिन्दुवार-उत्तरैः स्थितिः सुस्पष्टा

हिमसंस्कृतवार्ताः राघव नाथ झा, पाटलिपुत्रम्
मतदातृ-सूच्याः विशेष-गहन-पुनरीक्षणम् अर्थात् 'एसआईआर' इत्येतत् अधिकृत्य प्रचलति राजनैतिक- वाग्युद्धे केन्द्रीयमन्त्री लोकजनशक्ति-पक्षस्य (रामविलास) अध्यक्षश्च चिराग-पाशवानः विपक्षस्य प्रश्नान् प्रत्युत्तरितवान्। सः प्रश्नम् अकरोत् यत् यदि विपक्षस्य निर्वाचन-प्रक्रियायां निर्वाचन-आयोगस्य कार्यप्रणाल्यां च विश्वासः नास्ति, तर्हि कथं नाम कांग्रेस-दलस्य अभ्यर्थिनः निर्वाचनेषु विजयं प्राप्नुवन्ति, विविध-राज्येषु च तेषां सर्वकाराः निर्मीयन्ते? चिराग पासवानः वायनाड- लोकसभा-उपनिर्वाचने प्रियङ्कागान्ध्याः विजयस्य उदाहरणं दत्त्वा विपक्षम् अपृच्छत् यत् यदि निर्वाचन-आयोगस्य कार्यपद्धतौ निरन्तरं संशयः प्रकाश्यते, तर्हि कांग्रेसदलस्य प्रत्याशिनः विजयिनः कथं भवन्ति? सः केरल- हिमाचलप्रदेशयोः कांग्रेसशासनानाम् अपि उल्लेखं विहितवान्।

चिरागः विपक्षस्य उपरि भ्रम-प्रसारणस्य आरोपम् अकरोत्। तथापि, एसआईआर विषये तस्य भूमिका पूर्वमपि चर्चायाः विषयः आसीत्। सः २५ सितम्बर-दिनाङ्के उक्तवान् यत् निर्वाचन-आयोगः एका स्वतन्त्रा सांविधानिकी संस्था वर्तते; यदि अस्याः कार्यशैलीम् अधिकृत्य शङ्काः उत्पद्यन्ते, तर्हि आयोगेन विशेषतः मुख्य- निर्वाचन- आयुक्त-महोदयेन जनसमक्षं स्वपक्षः स्पष्टीकर्तव्यः।पूर्वम् आयोगस्य पार्श्वे स्वयमेव कृता आसीत् स्पष्टीकरणस्य याचना, एसआईआर विवादस्य मध्ये चिराग पासवानः पूर्वं स्वयमेव निर्वाचन-आयोगात् स्थिति-स्पष्टीकरणस्य याचनां कृतवान् आसीत्। तस्य कथनमासीत् यत् निर्वाचन-प्रक्रियां प्रति जनमानसे कस्यापि संशयस्य उत्पत्तिः न भवेत्। तेन एतदपि निवेदितं यत् आयोगेन विपक्षस्य कस्मैचिद् एकस्मै नेत्रे उत्तर-प्रदानस्य अपेक्षया जनतायाः मध्ये स्वस्थितिः स्पष्टीकर्तव्या, येन निर्वाचन-व्यवस्थायां दृढविश्वासः सुरक्षेत्।

२६ सितम्बरदिनाङ्के निर्वाचन-आयोगस्य उपवेशनानन्तरं चिराग पासवानः अवदत् यत् जनसामान्यात् आगताः चिन्ताः तस्य पक्षतः आयोगस्य समक्षम् उपस्थापिताः आसन्; अधुना च आयोगेन प्रमुखाः विषयाः बिन्दुवारम् अधिकृत्य स्वस्थितिः सुस्पष्टा विहिता। सः एसआईआर-प्रक्रियाम्, त्रयाणां निर्वाचन-आयुक्तानां सर्वसम्मतिं, मन्त्रिमण्डल- सचिवालयस्य सचिवेन सह सम्पन्नायाः मन्त्रणायाः तथ्यानां प्रकटनम् अपि उल्लिखितवान्।

### 'यूथ बोले तो' (युवा वदति) इत्यस्य कार्यक्रमस्यापि कृतः उल्लेखः

चिराग-पासवानः स्वकीयं 'यूथ बोले तो' इति युवा-संवाद- कार्यक्रमम् अपि न्यवेदयत्। सः अकथयत् यत् युवभ्यः स्वविचारान्, असहमतिम्, आशङ्काः, मार्गदर्शनानि च प्रस्तौतुं मञ्चः अनिवार्यतया देयः। पाटलिपुत्रस्य (पटना) अनन्तरं प्रयागराजस्य कार्यक्रमे सम्प्राप्तस्य युवा-समर्थनस्य उल्लेखं कुर्वन् सः अवदत् यत् अस्मात् जनसमर्थनात् उत्तरप्रदेशस्य आगामि- विधानसभा- निर्वाचनं योद्धु पक्षस्य सङ्कल्पः सुदृढः जातः।राहुल गान्धिनः युवा-संवादकार्यक्रमेण सह क्रियमाणायां तुलनायां चिरागः अवदत् यत् युवकानां कृते यावन्तः अधिकाः मञ्चाः स्युः, तावदेव श्रेयस्करं भविष्यति। एसआईआर विषये राजनैतिक-दलानां मध्ये प्रचलति विवादस्य मध्ये चिराग-पाशवानस्य आरम्भिकी याचना, तदनन्तरं निर्वाचन-आयोगस्य स्पष्टीकरणे तस्य प्रतिक्रिया च उभयमेव पुरतः आगतम्। तत्रैव, अन्यैः अपि राष्ट्रिय-जनतान्त्रिक- गठबन्धनस्य सहचरैः सितम्बरमासे आयोगस्य समीपे निर्वाचन-प्रक्रियाम् एसआईआर-विषयिणीश्च शङ्काः दूरीकर्तुं स्पष्टीकरणम् अभ्यर्थितम् आसीत्।

# अनुभव-प्रमाणपत्रे हस्ताक्षर-सत्यापनस्य अभावः केवलं 'शोधनीया प्रक्रियात्मक-त्रुटिः'; उच्चन्यायालयेन याचिका निरस्ता

**हिमसंस्कृतवार्ताः- शिमला।**
हिमाचलप्रदेश-उच्चन्यायालयेन स्पष्टीकृतं यत् यदि चयन-प्रक्रियायाः समये कस्यचित् अभ्यर्थिनः अनुभव-प्रमाणपत्रं समयोचितं समर्पितं स्यात्, किन्तु तस्मिन् अधिकारिणः प्रति-हस्ताक्षरं (प्रतिहस्ताङ्कनम्) न भवेत्, तर्हि इदं केवलम् एका शोधनीया प्रक्रियात्मिका त्रुटिः एव मन्येत। उच्चन्यायालयेन प्रतिपादितं यत् एतादृशानां लघीयसीनां त्रुटीनां परिष्काराय अभ्यर्थिभ्यः अतिरिक्त- समयप्रदानं सर्वथा न्यायसङ्गतं विधिसम्मतं च अस्ति। न्यायाधिपतेः ज्योत्स्ना रिवाल दुआ-महोदयायाः एकलन्यायपीठेन विशालकुमारेण प्रविष्टां याचिकां निरस्यन्त्या अयम् आदेशः श्रावितः।

उल्लेखनीयं यत् हिमाचलप्रदेश- राज्य- चयन-आयोगेन २०२४ तमस्य वर्षस्य मार्च-मासे 'समूह-अनुदेशकस्य' द्वादश (१२) पदानां कृते आवेदनानि आहूतानि आसन्। आवेदन-परीक्षण-सूच्यां विहितम् आसीत् यत् अनुभव-प्रमाणपत्रं सम्बद्ध-सर्वकारीयाधिकारिणा विभागेन वा सत्यापितं प्रतिहस्ताक्षरितं वा भवेत्।

### प्रपत्र-सत्यापनकाले ज्ञाता त्रुटिः, आयोगेन दत्तः अवसरः

प्रमाणपत्र-परीक्षण-वेलायां चयन-आयोगेन दृष्टं यत् वैयक्तिक-प्रतिवादिनः अनुभवपत्रे श्रम-अधिकारिणः प्रति-हस्ताक्षरं नासीत्। आयोगेन ३ मार्च २०२६ दिनाङ्के सार्वजनिकां सूचनां निर्गम्य निजी- प्रतिवादिना सह अन्येभ्यः अभ्यर्थिभ्यः अपि १२ मार्चपर्यन्तं तां त्रुटिं परिष्कर्तुं (प्रति-हस्ताक्षरित- प्रमाणपत्रं समर्पयितुम्) अवसरः प्रदत्तः। त्रुटि-निवारणानन्तरं यदा परीक्षा-परिणामः उद्घोषितः, तदा प्रतीक्षा-सूच्यां निजी-प्रतिवादी ७१.५० अङ्कैः सह प्रथम-स्थाने, याचिकाकर्ता च समानाङ्केषु सत्स्वपि द्वितीयस्थाने अभवत्।

### उच्चन्यायालये याचिकाकर्तुः तर्कः न्यायालयस्य च निर्णयः

याचिकाकर्त्रा उच्चन्यायालये याचिकां प्रविश्य तर्कः उपस्थापितः यत् अन्तिमतिथेः (२६ मार्च २०२४) व्यतीतायाः अनन्तरम् आयोगः निजी-प्रतिवादिने अनुभव-प्रमाणपत्रस्य सत्यापनाय अतिरिक्तं कालं दातुं न शक्नोति स्म।
किन्तु प्रकरणस्य समीक्षानन्तरं न्यायालयः अपश्यत् यत् ५ दिसम्बर २०२२ दिनाङ्कस्य संशोधिते




नियुक्ति-पदोन्नति-नियमे अनुभवपत्रस्य प्रति-हस्ताङ्कनाय कापि वैधानिक्या अनिवार्या नियमः नासीत्; एषः समयः केवलं विज्ञापनस्य परीक्षणसूचौ एका सामान्य-प्रक्रियात्मिका सूचना आसीत्।न्यायालयेन स्पष्टं प्रतिपादितं यत् अभ्यर्थिनां चयनस्य मौलिकः अधिकारः न स्यात् नाम, किन्तु निष्पक्ष-चयनप्रक्रियायां विचार्यमाणतायाः मौलिक- अधिकारः अवश्यं विद्यते। केवलं तान्त्रिक- त्रुटीनां प्रारूपदोषाणां वा आधारेण अभ्यर्थित्व-निरसनम् अनुचितम्। यावत् कश्चित् कपटः, मिथ्या-प्रस्तुतिः, वञ्चना वा न कृता स्यात्, तावत् लघीयसे प्रमादाय कस्यापि योग्यस्य अभ्यर्थिनः चयनं न रोद्धव्यम्।

# संस्कृत- संस्कृति- विकास- संस्थानस्य मध्यप्रदेशप्रान्तेन हिन्दीदिवसोपलक्ष्य हिन्दीमास- महोत्सवः २०२६ अन्तर्गते विशिष्टं व्याख्यानं सुसम्पन्नम्




**हिमसंस्कृतवार्ताः-** हिन्दीदिवसोपलक्ष्य हिन्दीमास-महोत्सवान्तर्गते संस्कृत- संस्कृति- विकास- संस्थानम्, मध्यप्रदेशप्रान्तेन दिनाङ्के २७ सितम्बर २०२६ तमे वर्षे, रविवासरे, सायं ७:३० वादने गूगल-मीट- माध्यमेन एकं विशिष्टव्याख्यानम् आयोजितम्। एतत् कार्यक्रमं परमपूजनीयस्य कुलगुरोः तथा कार्यक्रमस्य संरक्षकस्य आचार्यस्य राधागोविन्द त्रिपाठीमहोदयस्य (राष्ट्रियाध्यक्षः, संस्कृत- संस्कृति- विकाससंस्थानम्) संरक्षणे आयोजितम्। व्याख्यानस्य विषयः आसीत्- “हिन्दीभाषा: व्यापकता विवशता च”। कार्यक्रमस्य मुख्यः उद्देश्यः हिन्दीभाषायाः व्यापकता, वर्तमानकाले तस्याः उपयोगिता, वैश्विकस्तरे तस्याः सम्भावनाः तथा हिन्दीभाषायाः सम्मुखे स्थिताः विविधाः समस्याः इत्येतेषां विषयाणां विषये सार्थकमुद्बोधनम् आसीत्। कार्यक्रमस्य शुभारम्भः डॉ. प्रभातनारायण- पाण्डेयमहोदयेन वैदिकं मङ्गलाचरणं कृतम्। ततः माधुरीगर्ग- महोदयया स्वागतगीतं प्रस्तुतम्। कार्यक्रमे डॉ. आलोकचन्द्रपरिडा-महोदयेन स्वागतम् अतिथिपरिचयं च प्रस्तुतम्। कार्यक्रमस्य मुख्यातिथिः डॉ. वेदप्रकाशमिश्रमहोदयः, संकायाध्यक्षः, भाषाविभागः, डॉ. सी. वी. रमन विश्वविद्यालयः, बिलासपुरं, स्वकीय-उद्बोधने हिन्दीभाषायाः व्यापकतायाः, तस्याः समृद्धसाहित्यपरम्परायाः, विभिन्नाभिः भारतीयभाषाभिः सह तस्याः सम्बन्धस्य च विषये प्रकाशं प्रक्षिप्तवान्। सः हिन्दीभाषां ज्ञानस्य, संवादस्य तथा जनसञ्चारस्य प्रभावीमाध्यमरूपेण विकसितुम् आवश्यकतां प्रतिपादितवान्। एतस्मिन् सन्दर्भे मुख्यवक्ता डॉ. संजयकुमारद्विवेदीमहोदयः, अतिथिविद्वान्, मानवविज्ञानविभागः, इलाहाबाद- विश्वविद्यालयः, प्रयागराजः, उत्तरप्रदेशः, “हिन्दीभाषा: व्यापकता च विवशता च” इति विषये विस्तृतं विचारपूर्णं च व्याख्यानं प्रस्तुतवान्। सः हिन्दीभाषायाः वर्तमानस्वरूपस्य, सामाजिक- स्वीकारस्य, शिक्षाक्षेत्रे प्रशासनक्षेत्रे च तस्याः भूमिकायाः, आधुनिकप्रौद्योगिक्यां वैश्विकपरिवेशे च हिन्दीभाषायाः सम्मुखे स्थितानां विविधसमस्यानां विषये विस्तरेण चर्चां कृतवान्। हिन्दीभाषायाः विकासाय तस्याः व्यावहारिकप्रयोगस्य, नवीनज्ञान-विज्ञानयोः सह सम्बन्धस्य तथा यूनां कृते हिन्दीभाषां प्रति रुचेः विकासस्य आवश्यकता अस्ति इति सः प्रतिपादितवान्। कार्यक्रमस्य अध्यक्षता प्रो. (डॉ.) निलिम्पत्रिपाठी- महोदयेन (प्रान्ताध्यकक्षः, संस्कृत- संस्कृति- विकास- संस्थानम्, मध्यप्रदेश-प्रान्तः) कृता। स्वकीयाध्यक्षीयोद्बोधने हिन्दीभाषां भारतीय- सांस्कृतिकचेतनायाः, जनसञ्चारस्य सशक्तां भाषां कथयित्वा तस्याः संरक्षणस्य, संवर्धनस्य तथा समुचितप्रयोगस्य च महत्त्वं प्रतिपादितवान्। तदनन्तरं डॉ. तुलसीदासपरौहा- महोदयेन (प्रान्तोपाध्यक्षः, संस्कृत- संस्कृति- विकास- संस्थानम्, मध्यप्रदेशप्रान्तः) धन्यवादज्ञापनं कृतम्। कार्यक्रमस्य कुशलं सञ्चालनं डॉ. नवीनकुमारचौबे- महोदयेन, (विभागाध्यक्षः, शिक्षाविभागः, महर्षि- महेशयोगी- वैदिक- विश्वविद्यालयः, मध्यप्रदेशः) कृतम्। कार्यक्रमस्य समापनं ब्रजकिशोरशुक्ल-महोदयेन शान्तिपाठेन कृतम्। अस्य कार्यक्रमस्य आयोजनाध्यक्षा प्रो. अञ्जुसेठमहोदया, पूर्वप्राचार्या, सत्यवतीमहाविद्यालयः, राष्ट्रियाध्यक्षा, महिलाप्रकोष्ठः, संस्कृत- संस्कृति- विकास- संस्थानम्; संयोजकः डॉ. कृष्णकान्तभार्गव- महोदयः, राष्ट्रियसहसचिवः, संस्कृत- संस्कृति- विकास- संस्थानम्, समन्वयिका डॉ. गीतादुबे महोदया, अध्यक्षा, गुरुकुलप्रकल्पः, संस्कृत- संस्कृति- विकास- संस्थानं, महाराष्ट्रप्रान्तः तथा आयोजनसचिवः डॉ. आलोकचन्द्रपरिडा-महोदयः, प्रान्तमन्त्री, संस्कृत-संस्कृति-विकास-संस्थानं, मध्यप्रदेश-प्रान्तः, च आसन्।कार्यक्रमे देशस्य विभिन्नप्रदेशेभ्यः शिक्षाविदः, शोधार्थिनः, विद्यार्थिनः तथा हिन्दी-संस्कृतप्रेमिणः ऑनलाइन-माध्यमेन सहभागितां स्वीकृतवन्तः। अनेन कार्यक्रमेण हिन्दीभाषायाः व्यापकस्वरूपस्य, तस्याः वर्तमानसमस्यानां, भविष्यस्य सम्भावनानां विषये सार्थकं ज्ञानवर्धकं च चर्चा जाता। संस्कृत- संस्कृति- विकास- संस्थानं, मध्यप्रदेशप्रान्तद्वारा समग्ररूपेण एतत् विशिष्टव्याख्यानं हिन्दीभाषायाः प्रति जागरूकतायाः, तस्याः व्यापकप्रयोगस्य तथा भारतीयभाषिक- सांस्कृतिकपरम्परायाः संरक्षणस्य संवर्धनस्य च दिशि एकः सार्थकः प्रयासः सिद्धः इति शम्।

# सोलने श्रद्धया आचरितः आचार्य- दिवाकरदत्तशर्मणः
## राज्यस्तरीय- जयन्तीसमारोहः, विद्वद्भिः कृतं कृतित्वस्य स्मरणम्



हिमसंस्कृतवार्ताः- सोलनम् ।राजकीय- संस्कृत- महाविद्यालये सोलने हिमाचल- संस्कृताकादम्या आयोजितः 'आचार्यदिवाकरदत्तशर्मा- राज्य- स्तरीय- जयन्तीसमारोहः' अतीव श्रद्धया गरिमामये वातावरणे च सम्पन्नः अभवत्। कार्यक्रमे प्रदेशस्य समस्तेभ्यः भागेभ्यः समागतैः संस्कृतविद्वद्भिः आचार्यवर्यस्य जीवनम्, व्यक्तित्वम्, कृतित्वं, भारतीयज्ञानपरम्परायां तस्य अमूल्यं योगदानं रेखाङ्कितम्।समारोहे डॉ. कुमारसिंहसिसोदिया मुख्यतिथिरूपेण उपस्थितः आसीत्, यदा च कार्यक्रमस्याध्यक्षतां प्रख्यातविद्वान् डॉ. लेखरामशर्मा अकरोत्। मुख्यवक्त्रारूपेण प्रेमलालगौतमेन आचार्यदिवाकरदत्तस्य जीवनदर्शनमधिकृत्य विस्तरेण प्रकाशः पातितः। कार्यक्रमस्य कुशलं मञ्चसञ्चालनं डॉ. भानुशर्मणा कृतम्। अस्मिन् गरिमामये अवसरे आचार्यदिवाकरदत्तशर्मणः सुपुत्री डॉ. करुणाभारद्वाजः विशेषरूपेण उपस्थिता आसीत्। तया सह डॉ. सुधाकरः, डॉ. ओमप्रकाशराही, आचार्यराधेश्यामः, डॉ. पद्मनाभः, पण्डितमोहनलालशर्मा, वत्सदेशराजशर्मा, डॉ. उमादत्तभट्टः, डॉ. राधा, डॉ. देवकान्तशर्मा, डॉ. विनोदशर्मा च इत्यादयः बहवः मूर्धन्यविद्वांसः परिचर्चायां सहभागिनः अभवन्।हिमाचल- संस्कृत- अकादम्याः सचिवेन डॉ. प्रवीणकुमारविमलेन सह नरेन्द्रकुमारः, जगदीशकुमारः, पवनकुमारश्च कार्यक्रमस्य गरिमां समवर्धयन्।युवकेषु संस्कृतं प्रति रुचिवर्धनाय आयोजितायां प्रतिरूपनिर्माण- प्रतियोगितायां हितेन्द्रः आदित्यश्च प्रथमम्, अतुलः द्वितीयं, सुमितश्च तृतीयं स्थानं प्राप्तवन्तः, ये अकादम्या पुरस्कृताः। राजकीय- संस्कृत- महाविद्यालयस्य सोलनस्य पक्षतः डॉ. विनयशर्मा, डॉ. दिनेशशर्मा, डॉ. आशाशर्मा, डॉ. सुरेशभारद्वाजः, डॉ. पवनगौतमः, डॉ. देवकुमारनेगी, कार्यालयविभागात् विपिनाठाकुरः पङ्कजसूदश्च आयोजनस्य व्यवस्थासु सहयोगं प्रदत्तवन्तः। अन्ते डॉ. विनयशर्मणा सर्वेषाम् अतिथीनां छात्राणां च कृतज्ञता ज्ञापिता। समारोहस्य समापनं राष्ट्रगानेन सह सामूहिक- देशभक्तिभावेन अभवत्।

# आचार्य- दिवाकरदत्तशर्मा- महोदयस्य जयन्त्यवसरे ऊनाजनपदे लेखकसङ्गोष्ठ्याः आयोजनम्





हिमसंस्कृतवार्ताः:- स्वतन्त्र कौशलः ऊना।28 सितम्बर 2026 तमे दिनाङ्के हिमाचल- कला- संस्कृतिः एवं भाषा- अकादमी, शिमला इत्यनया आचार्यस्य दिवाकरदत्तशर्मा- महोदयस्य जयन्त्यवसरे लतामङ्गेशकर- कलाकेन्द्रं समूरकलां ऊनाजनपदे राज्यस्तरीयसमारोहस्य आयोजनं कृतम्। कार्यक्रमस्य गणमान्य- अतिथिभिः आचार्यः दिवाकरदत्तमहोदयस्य प्रतिमायाः समक्षं दीपप्रज्ज्वलनं कृत्वा पुष्पाञ्जलिं च समर्प्य समारोहस्य शुभारम्भः कृतः।

हिमाचल- संस्कृत- अकादमी इत्यस्य पूर्वसचिवः संस्कृतविद्वान् च डॉ. मस्तरामशर्ममहोदयः समारोहस्य प्रथमसत्रस्य अध्यक्षतां कुर्वन् स्ववक्तव्ये अवदत् यत् आचार्यदिवाकर- दत्तमहोदयस्य हिमाचलस्य संस्कृतेः संस्कृत भाषायाः च संरक्षणे संवर्धने च महत्त्वपूर्णं योगदानम् अस्ति। कार्यक्रमस्य प्रथमसत्रे राजकीय- संस्कृत- महाविद्यालयस्य सोलनस्य प्राचार्येण डॉ. रमेशशर्मणा 'ज्योतिषशास्त्रे आचार्यदिवाकरदत्तस्यावदानम्' इति विषये शोधपत्रं प्रस्तुतम्। तदनन्तरं डॉ. मदनमोहनशर्मा, जगतप्रकाशशास्त्रीमहोदयाभ्याम् आचार्य- दिवाकरदत्तशर्मा महोदयस्य योगदाने व्याख्याने प्रदत्ते।

कार्यक्रमस्य द्वितीये सत्रे कविसम्मेलनम् आयोजितं यस्मिन् प्रदेशस्य विभिन्नजनपदेभ्यः समागतैः साहित्यकारैः शान्तिकुमारस्यालवर्यः, डॉ. श्रीनाथधरद्विवेदीवर्यः, कुन्दनलालशर्मावर्यः, ओमकुमारशर्मावर्यः कृष्णलद्दाखीवर्यः, कुलदीपशर्मावर्यः, चांदप्रकाशवर्यः, अशोककालियावर्यः, रामपालवर्यः, अलका चावलामहोदया, ओङ्कार प्रसादवर्यः, डॉ. रत्नचन्दरत्नाकरवर्यः, बालकृष्णसोनीवर्यः, अकादमीसदस्यः जाहिद अबरोलवर्यः इत्येतैः च कवितापाठः कृतः। कविसम्मेलनस्य अध्यक्षता सेवानिवृत्त- प्राचार्येण डॉ. ओमदत्त' सरोच' महोदयेन कृता। समारोहे आचार्यः महोदयस्य सुपौत्रः अधिवक्ता विरोचनशर्मा विशिष्टातिथिरूपेण उपस्थितः आसीत्। समारोहे डॉ. अमितशर्मा 'सरोच' महोदयेन मञ्चसञ्चालनं कृतम्। कार्यक्रमस्य अन्ते जनपद- भाषा अधिकारिणा निक्कूराममहोदयेन प्रदेशस्य विभिन्नजनपदेभ्यः समागतानां साहित्यकाराणाम् अतिथीनां च धन्यवादः कृतः। अस्मिन् अवसरे अकादमी- अनुसन्धान- अधिकारी स्वतन्त्रकौशलवर्यः, अनिलकुमारवर्यः पुस्तकालयाध्यक्षः, रविन्द्रकुमारवर्यश्च उपस्थिताः आसन्।

# एफ्ओआर् (FoR) व्यवस्थायां प्रमादः न सहिष्यते, विक्रय-केन्द्रं (रिटेलर प्वाइण्ट्) यावत् उर्वरक-प्रापणं संस्थानां दायित्वम्



**उर्वरकेण सह अन्य-वस्तूनां बलात् संलग्नीकरणे (टैगिंग्) भविष्यति कठोर- कार्याचरणम् : कृषिमन्त्री विजयकुमार-सिन्हा**

पाटलीपुत्रम् (पटना), २८ सितम्बर २०२६।

हिमसंस्कृतवार्ताः राघव नाथ झा

बिहार-राज्ये कृषकाणां कृते उर्वरकस्य (उर्वरकानां) सुगमं समयबद्धं च उपलब्धिं निश्चेतुं कृषिमन्त्री विजयकुमार-सिन्हा उर्वरक-निर्माण- संस्थाभ्यः कृषि-विभागस्य अधिकारिभ्यश्च दृढ- निर्देशान् प्रादात्। सः अवदत् यत् एफ्ओआर् (FoR - Free on Rail/Road) पद्धत्यनुसारेण अन्तिम-विक्रय-केन्द्रं (रिटेलर प्वाइण्ट्) यावत् उर्वरक-वितरणं संस्थानां दायित्वं वर्तते, अस्मिन् विषये च कस्यापि प्रकारकः प्रमादः शिथिलता वा नैव सहिष्यते।

मन्त्री न्यवेदयत् यत् जनपद-प्रखण्ड-स्तरेषु उर्वरक-वितरणस्य निरन्तरं निरीक्षणं क्रियेत, स्पष्ट-उत्तरदायित्वं च निर्धार्य एतत् सुनिश्चीयतां येन कृषकाणां कृते उर्वरक-प्राप्तौ कापि बाधा नोत्पद्येत। जनपद-कृषि-अधिकारिणः नियमित- निरीक्षणं कृत्वा द्रक्ष्यन्ति यत् एफ्ओआर्- व्यवस्थायाः अनुसारं निर्धारित-समये विक्रय- केन्द्रेषु उर्वरकं प्राप्यते न वा।

सः उर्वरक-संस्थाभ्यः कठोर-निर्देशं दत्तवान् यत् उर्वरकेण सह कस्यापि अन्य-उत्पादस्य अनिवार्य- संलग्नीकरणाय (टैगिंग्-करणाय) अथवा तस्य बलात् क्रयणाय कृषकाणां, थोक-विक्रेतृणां, फुटकर-विक्रेतृणां (रिटेलर्) च उपरि किमपि दबावं न क्रियेत। एतादृश्याः कस्यापि अनियमिततायाः सूचनायां सत्यां तत्क्षणमेव अनुसन्धानं कृत्वा दोषिणः विरुद्धं नियमानुसारेण कठोर-दण्ड-कार्याचरणं भविष्यति।

# उपमण्डलस्तरीय प्रतियोगितासु

## विद्यार्थिभिः प्रदर्शिता प्रतिभा



**हिमसंस्कृतवार्ताः- सत्येन्द्रपाठकः, लखनऊ।**

महमूदाबाद (सीतापुरम्) उपमण्डलस्य नामिते नोडलविद्यालये कॉल्विन इण्टर महाविद्यालये, महमूदाबादे सोमवासरे विभिन्नविद्यालयानां विद्यार्थिनां मध्ये उपमण्डलस्तरीयाः कलाप्रतियोगिता, भाषणप्रतियोगिता, वादविवाद- प्रतियोगिता आयोजिताः। प्रतियोगितासु विद्यार्थिभिः उत्साहपूर्वकं सहभागित्वं कृत्वा स्वकीयां सृजनात्मकप्रतिभाम्, अभिव्यक्तिकौशलं, तार्किकक्षमतां च प्रदर्शितम्।कक्षा ५ तः ८ पर्यन्तं विद्यार्थिभ्यः कलाप्रतियोगिता, कक्षा ९ तः १२ पर्यन्तं विद्यार्थिभ्यः कलाप्रतियोगिता, भाषणप्रतियोगिता, वादविवाद- प्रतियोगिता च आयोजिताः। कलाप्रतियोगितायां (कक्षा ५–८) सीता इण्टर महाविद्यालये, महमूदाबादस्य आयुषीवर्मा प्रथमस्थानं प्राप्तवती। कॉल्विन इण्टर महाविद्यालये, महमूदाबादस्य शैलेन्द्रः द्वितीयस्थानं, सीता इण्टर महाविद्यालये, महमूदाबादस्य महरसिंहः तृतीयस्थानं प्राप्तवान्। मुस्कान कश्यपः चतुर्थं, मो. हस्सानः पञ्चमं स्थानं प्राप्तवन्तौ। कलाप्रतियोगितायां (कक्षा ९–१२) बेनीराम इण्टर महाविद्यालये, पैतेपुरस्य इफत् प्रथमस्थानं प्राप्तवती। कॉल्विन इण्टर महाविद्यालये, महमूदाबादस्य करन राजपूतः द्वितीयस्थानं, बेनीराम इण्टर महाविद्यालये, पैतेपुरस्य लक्ष्मीदेवी च तृतीयस्थानं प्राप्तवती। बंटी कश्यपः चतुर्थं, मो. अयानः च पञ्चमं स्थानं प्राप्तवान्। वादविवादप्रतियोगितायां सीता इण्टर महाविद्यालये, महमूदाबादस्य दीपकगुप्तः प्रथमस्थानं प्राप्तवान्। सीता इण्टर कॉलेजे, महमूदाबादस्य आशुतोषकुमारवर्मा द्वितीयस्थानं तथा कॉल्विन इण्टर महाविद्यालये, महमूदाबादस्य मो. हसीबः तृतीयस्थानं प्राप्तवान्। दीपककुमारः चतुर्थम्, उमरा च पञ्चमं स्थानं प्राप्तवती।

भाषणप्रतियोगितायां बेनीराम इण्टर महाविद्यालये, पैतेपुरस्य गुड़िया यादवः, मारिया खातून, सीता इण्टर महाविद्यालये, महमूदाबादस्य उज्ज्वलवर्मा, दिव्यांशयादवः, एबीएमएल श्यामदासपुरस्य अनन्या गुप्ता च सहभागितां कृतवन्तः।

प्रतियोगिताभिः विद्यार्थिनां सृजनात्मकचिन्तनस्य, प्रभावी- अभिव्यक्तिकौशलस्य, तार्किकदृष्टेः, आत्मविश्वासस्य च विकासाय अवसरः प्राप्तः। आयोजने विभिन्नविद्यालयानां विद्यार्थिनः, शिक्षकाः, प्रधानाचार्याः च उत्साहपूर्वकं सहभागितवन्तः। आयोजकैः सर्वेभ्यः विजेतृभ्यः प्रतिभागिभ्यश्च शुभकामनाः प्रदत्ताः। प्रतियोगिताः विद्यार्थिनां प्रतिभां ज्ञातुं तस्याः निरन्तरं परिष्काराय च महत्त्वपूर्णं माध्यममिति आयोजकैः प्रतिपादितम्।

# ब्रह्मकपालतीर्थम्- यत्र भगवान् शिवः ब्रह्महत्यादोषात् मुक्तिं प्राप्तवान्






**- शंकराचार्यधर्माधिकारी, उत्तराखण्डविद्वत्सभा संरक्षको ज्योतिषाचार्यश्च डॉ. रमेशचन्द्रपाण्डेयः**

पितृपक्षे सनातनपरम्परायां स्वर्गतान् पूर्वजान्प्रति श्रद्धा, स्मरणं, कृतज्ञता च विशेषतया प्रकट्यते। अस्मिन् काले पितृणां तृप्त्यर्थं तर्पणं, पिण्डदानं, श्राद्धकर्म च विधीयते। भारतस्य प्रमुखेषु पितृतीर्थेषु बदरीनाथधाम्नः समीपे अलकनन्दानद्याः तीरे स्थितं ब्रह्मकपालतीर्थं विशिष्टं स्थानमधिकरोति। ब्रह्मकपालतीर्थं बदरीनाथमन्दिरात् किञ्चिद्दूरे स्थितम् अस्ति। धार्मिकमान्यतानुसारम् अत्र पिण्डदानं कृत्वा पितृणां सद्गतिः भवति तथा तेषामात्मनः मोक्षप्राप्तिः भवतीति श्रद्धा अस्ति। पितृपक्षे देशस्य विभिन्नभागेभ्यः श्रद्धालवः अत्र आगत्य स्वकीयपूर्वजानां निमित्तं श्राद्धतर्पणादिकर्माणि सम्पादयन्ति।

**भगवतः शिवस्य ब्रह्महत्यादोषमुक्तिः**

ब्रह्मकपालतीर्थस्य सर्वाधिकं प्रसिद्धं पौराणिकमहत्त्वं भगवता शिवेन सम्बद्धम् अस्ति। पुराणप्रसिद्धकथानुसारं ब्रह्मणा सृष्टिरचनायाः कार्ये प्रवर्तमानकाले भगवतश्शिवस्य क्रोधः उत्पन्नः। तदा शिवेन ब्रह्मणः एकं शिरः छिन्नवान्। तेन ब्रह्महत्यादोषः शिवम् अन्वगच्छत् तथा ब्रह्मणः तत् कपालं शिवस्य हस्ते संलग्नम् अभवत्। दोषविमोचनार्थं भगवान् शिवः अनेकेषां स्थलानां भ्रमणं कृतवान्। अन्ते बदरीनाथक्षेत्रे यत्र ब्रह्मणः कपालं भूमौ पतितं, तत्स्थानं ब्रह्मकपालतीर्थनाम्ना प्रसिद्धम् अभवत्। मान्यतानुसारं अत्रैव भगवान् शिवः ब्रह्महत्यादोषात् विमुक्तिं प्राप्तवान्। अत एव अस्य तीर्थस्य धार्मिकमहत्त्वं विशेषरूपेण वर्तते।

**पितृकर्मणां प्रमुखं तीर्थम्**

ब्रह्मकपालतीर्थं पितृणां श्राद्धस्य पिण्डदानस्य तर्पणस्य च प्रमुखं केन्द्रम् अस्ति। मान्यतानुसारं यः श्रद्धालुः स्वकीयपितृणां निमित्तम् अत्र पिण्डदानं करोति, तेन पितृणां तृप्तिः तथा सद्गतिः प्राप्यते इति विश्वासः अस्ति। भारतीयपरम्परायां गया, काशी, हरिद्वारं, बदरीनाथं च पितृकर्मणां प्रमुखतीर्थानि मन्यन्ते। एतेषु ब्रह्मकपालतीर्थस्य विशिष्टं स्थानमस्ति। धार्मिकमान्यतानुसारं अत्र पिण्डदानं कृत्वा पुनः अन्यस्मिन् तीर्थे पिण्डदानं न करणीयम् इति परम्परा प्रचलिता अस्ति।

**पाण्डवैः अपि कृतं पिण्डदानम्**

ब्रह्मकपालतीर्थस्य सम्बन्धः महाभारतपरम्परया अपि सम्बद्धः अस्ति। धार्मिककथानुसारं महाभारतयुद्धस्य अनन्तरं भगवान् श्रीकृष्णस्य निर्देशेन पाण्डवाः ब्रह्मकपालतीर्थं गत्वा स्वकीयपितृणां श्राद्धं कृतवन्तः। युद्धे मृतानां स्वकीयबान्धवानां अन्येषां च मृतानां निमित्तं पाण्डवैः अत्र श्राद्धकर्म सम्पादितम् इति परम्परा वर्तते। अतः ब्रह्मकपालतीर्थं महाभारतसम्बद्धपरम्परायाः अपि महत्त्वपूर्णं केन्द्रम् अस्ति।

**श्राद्धस्य मूलभावः श्रद्धा**

श्राद्धकर्मणः मूलभावः श्रद्धा एव मन्यते। पितृणां स्मरणं कृत्वा तेषां प्रति सम्मानं कृतज्ञतां च प्रकटयितुं श्राद्धं क्रियते। अतः पिण्डदानं केवलं कर्मकाण्डरूपेण न, अपि तु पूर्वजानां प्रति कृतज्ञताभावस्य प्रतीकरूपेणापि द्रष्टव्यम्। मनुष्यस्य वर्तमानजीवनस्य पृष्ठतः पूर्वजानां संस्काराः, त्यागाः, परिश्रमाः, अनुभवाश्च निहिताः भवन्ति। पितृपक्षः तान् पूर्वजान् स्मर्तुं तेषां प्रति कृतज्ञतां प्रकटयितुं च अवसरं प्रददाति।

**विदेशेभ्यः अपि आगच्छन्ति श्रद्धालवः**

ब्रह्मकपालतीर्थस्य महत्त्वं भारतदेशपर्यन्तं सीमितं नास्ति। विदेशेषु निवसन्तो भारतीयमूलसम्बद्धाः श्रद्धालवः अपि स्वकीयपितृणां निमित्तं अत्र आगत्य श्राद्धतर्पणपिण्डदानादिकर्माणि कुर्वन्ति। नेपाल मलेशिया रूस अमेरिका इत्यादिदेशेभ्यः अपि श्रद्धालवः बदरीनाथं ब्रह्मकपालतीर्थं च प्रति आगच्छन्ति इति उल्लेखः प्राप्यते।

**पितृपरम्परायाः जीवितं प्रतीकम्**

ब्रह्मकपालतीर्थं केवलं पिण्डदानस्य स्थानं न, अपितु भारतीयपितृपरम्परायाः, पुराणकथानां, तीर्थसंस्कृतेः, आध्यात्मिकचिन्तनस्य महत्त्वपूर्णं केन्द्रम् अस्ति। भगवतः शिवस्य ब्रह्महत्यादोषमुक्तेः कथा, पाण्डवानां पितृकर्मपरम्परा, वर्तमानकाले च श्रद्धालूनाम् आस्था अस्य तीर्थस्य बहुआयामी महत्त्वं प्रकाशयति।

अतः ब्रह्मकपालतीर्थं भारतीयसंस्कृतेः तादृशं पावनं तीर्थस्थानम् अस्ति, यत्र श्रद्धा स्मरणं कृतज्ञता च एकत्र समागत्य पितृपरम्परां जीवितां धारयन्ति।



## गयासुरस्य बलिदानेन सञ्जातं महातीर्थं गयाक्षेत्रम् यत्र पितृणां समक्षं नश्यन्ति जाति-वर्गयोः सर्वे भेदाः।

गयाक्षेत्रम्।महातीर्थं गयाक्षेत्रम् अद्य केवलं मोक्षभूमिः एव नास्ति, अपि तु भारतीय-सांस्कृतिक-समरसतायाः सर्वोत्कृष्टं जीवन्तम् उदाहरणं वर्तते। गयातीर्थस्य विदुषा आचार्येण डॉ. पं. सुबोध पाठकेन उक्तं यत् यस्मिन् समये समाजः जाति-वर्गयोः नाम्ना विभक्तः दृश्यते, तस्मिन्नेव काले गयाक्षेत्रं सहस्रवर्षेभ्यः सर्वान् वर्गान् एकस्यामेव पवित्रायां परम्परायां योजयति।

**गयासुरस्य बलिदानं पितृमोक्षस्याधारः सञ्जातः**

गरुडपुराणस्य गयामाहात्म्यस्य च अनुसारेण गयासुरस्य महत्या तपस्यया प्रसन्नेन भगवता विष्णुना तस्य देहः पञ्चक्रोशी-गयाक्षेत्ररूपेण प्रतिष्ठितः। विष्णुपदस्य धर्मशिला तस्याः एव दिव्यायाः कथायाः स्मृतिः अस्ति, यत्र भगवान् गदाधरः विष्णुः पितृदेवतारूपेण विराजमानः वर्तते। तदारभ्य एव गयाक्षेत्रं पितृश्राद्धस्य पिण्डदानस्य च सर्वोच्चं तीर्थं मन्यते।

**षल्लक्षाधिकाः श्रद्धालवः पितृऋणं विमुक्तवन्तः**

डॉ. पाठकेन सूचितं यत् २८ सितम्बर-दिनाङ्कं यावत् षल्लक्षाधिकाः श्रद्धालवः गयातीर्थे श्राद्धं, तर्पणं, पिण्डदानं च कृतवन्तः। देशस्य उत्तर- दक्षिण-पूर्व- पश्चिमादिभ्यः भागेभ्यः आगताः सर्वेऽपि समुदायाः अस्मिन् एकस्मिन् एव विष्णुपदधाम्नि स्व-स्व-कुलाचारमनुसृत्य पितृकर्म समापयन्ति। अत्र कस्यापि परिचयः जातिः न, अपि तु श्रद्धा भवति। तेनोक्तं यत् गयाक्षेत्रस्य सनातनः सन्देशः सुस्पष्टः वर्तते- "पितरः सर्वेषामेव सन्ति, अत एव समाजोऽपि सर्वेषाम्।" इयमेव परम्परा भारतं संयोजयति, आगमि-सन्ततीभ्यः च समरस-समाजस्य मार्गं प्रदर्शयति।



## आपद्-त्राणाय सेतु-निर्माण-निगमात् सार्ध-द्विकोटिः (₹२.५० कोटि), मार्ग-विकास-निगमाच्च द्विकोटिः (₹२.०० कोटि) — मुख्यमन्त्रि-सहायता-कोषे सार्ध-चतुष्कोटि-रूप्यकाणां (₹४.५० कोटि) पृथक्-पृथक् योगदानम्

क्रमशः.. अष्टमे पृष्ठे

# हिमाचलप्रदेशस्य नामकरणकर्तुः आचार्यदिवाकरदत्तशर्मणः जयन्तीदिने कृतज्ञसमाजेन कृतं भावपूर्णं स्मरणम्




> संस्कृतपत्रकारितायां गीर्वाणवाण्याः संवर्धने च तस्य योगदानम् ऐतिहासिकम्
> संस्कृतशिक्षकपरिषद् हिमसंस्कृतम् न्यासः इत्येतयोः संयुक्तोपक्रमे आभासीयपटले आयोजिता गोष्ठी

**हिमसंस्कृतवार्ता - कार्यालयीयः प्रतिनिधिः।**
हिमाचलाय 'हिमाचलप्रदेशः' इति गौरवमयं नाम प्रदायकेन मूर्धन्यविदुषा, प्रख्यातमनीषिणा, आधुनिकसंस्कृतपत्रकारितायाः आधारस्तम्भेन आचार्यदिवाकरदत्तशर्मणा सह सम्बद्धे पावनजयन्त्यवसरे हिमाचलराजकीयसंस्कृत-शिक्षकपरिषदा हिमसंस्कृतम्-न्यासेन च तस्य भावपूर्णं स्मरणं कृतम्। अस्मिन् उपलक्ष्ये एका अन्तर्जालविचारगोष्ठी आयोजिता, यस्यां हिमाचलसंस्कृत-अकादम्याः पूर्वसचिवेन डॉ केशवानन्दकौशलेन , हिमाचलकलासंस्कृतिभाषा-अकादम्याः भूतपूर्वसचिवेन डॉ. कर्मसिंहेन, परिषदः प्रदेशाध्यक्षेण कमलकान्तगौतमेन, महासचिवेन डॉ. अमनदीपशर्मणा तथा भूतपूर्वप्रदेशाध्यक्षेण डॉ. मनोजशैलेन च आचार्यवर्यस्य जीवनवृत्तम्, संस्मरणानि, तस्य ऐतिहासिकं योगदानं चाधिकृत्य विस्तरेण प्रकाशः पातितः। कार्यक्रमे आचार्यदिवाकरदत्तशर्मणः पौत्रः अधिवक्ता विरोचनः विशेषेण उपस्थितः आसीत् तथा च डॉ अमितशर्मा धन्यवादज्ञापनं कृतवान्। वक्तृभिः देववाण्याः संस्कृतस्य संवर्धने, भारतीयसंस्कृतेः संरक्षणे, समाजे च सांस्कृतिकचेतनायाः जागरणाय कृताः तस्य प्रयासाः रेखाङ्किताः। १९२३ तमस्य वर्षस्य सितम्बरमासस्य २८ तमे दिनाङ्के शिमलाजनपदस्य धामीग्रामे लब्धजन्मा आचार्यदिवाकरदत्तशर्मा स्ववैदुष्येण लोककल्याण-कारिदृष्ट्या च संस्कृतभाषां मठेभ्यः मन्दिरेभ्यश्च बहिः आनीय जन-जनं प्रति प्रापयत्।

पञ्जाबविश्वविद्यालयस्य शास्त्रीपरीक्षामुत्तीर्य सः लाहौरनगरस्थस्य १९४१ तमे वर्षे शिमलानगरस्थे नेहरुसंस्कृतमहाविद्यालये अध्यापनकार्यम् आरब्धवान् तथा च १९४३ तः १९८३ पर्यन्तं तत्र प्राचार्यरूपेण भाविपीढीनां सफलं मार्गदर्शनम् अकरोत्। तस्य असाधारणपाण्डित्यं वीक्ष्य शीर्षविद्वत्संस्थाभिः सः 'विद्यालङ्कारः', 'विद्या-वाचस्पतिः', 'काव्यतीर्थः', 'साहित्याचार्यः', 'विद्यावागीशः' इत्यादिभिः प्रतिष्ठिताभिः उपाधिभिः विभूषितः। आचार्यवर्यः हिमाचले आधुनिकसंस्कृतपत्रकारितायाः 'भीष्मपितामहः' मन्यते। सः १९५६ तमे वर्षे मशोबरा (शिमला) स्थानात् 'दिव्यज्योतिः' इति संस्कृतमासिकपत्रिकायाः ऐतिहासिकं प्रकाशनम् प्रारभत, या सार्धशतकादप्यधिकं कालं यावत् (१९५६ तः २००९ पर्यन्तम्) निरन्तरं प्रकाशिता भूत्वा संस्कृतजगति एकः वैचारिकसेतुः अभवत्। सः 'संस्कृतं कठिनं नास्ति' इति भावम् आत्मसात्कृत्य सरलया प्रसादमय्या च शैल्या समसामयिक-सामाजिक-राजनैतिकविषयान् संस्कृतस्य माध्यममकरोत्। एतदतिरिच्य सः 'विश्वशान्तिः', 'लोकबन्धुः', 'अमरहिमाचलः' इत्यादीनां पत्राणां सम्पादनं सञ्चालनं च कृत्वा जनजागरणस्य दीपं प्रज्वालितवान् तथा १९५६ तमे वर्षे 'संस्कृतशोधसंस्थानस्य' स्थापनाम् अकरोत्। साहित्यक्षेत्रे आचार्यवर्येण 'श्रीसहस्रशीर्षसूक्तम्', 'महापुरुषवचनामृतम्', 'महात्मागान्धिवचनामृतम्', 'मधुरिमा', 'विचारामृतम्', 'फलादेशकल्पतरुः' इत्यादीनां कालजयीग्रन्थानां प्रणयनं कृत्वा साहित्यं समृद्धीकृतम्। तस्य समर्पणाम् अवलोक्य १९७० तमे वर्षे राज्यसर्वकारेण 'संस्कृत-हिन्दी-लेखक-सम्मानः', १९७२ तमे वर्षे 'राष्ट्रियशिक्षकपुरस्कारः', १९९७ तमे वर्षे च अकादम्या सर्वोच्चः 'शिखरसम्मानः' तस्मै समर्पितः।

## आचार्यस्य संस्कृतपत्रकारितायाः प्रेरणया एव हिमसंस्कृतवार्ता

वक्तारः अवदन् यत् आचार्यवर्येण निर्मितस्य वैचारिकधरातलस्यैव एतत् सुखदं प्रतिफलं यत् प्रदेशसर्वकारेण संस्कृतं प्रति 'द्वितीयराजभाषायाः' गौरवं दत्तम्। अद्य तस्यैव भगीरथप्रयासानां प्रेरणया हिमसंस्कृतम्-न्यासेन 'हिमसंस्कृतवार्ताः' इति ई-पत्रस्य सफलं सञ्चालनं क्रियते, येन केवलं षट्सु वर्षेषु देशे विदेशे च स्वकीया विशिष्टा अभिज्ञा स्थापिता।

## आचार्यवर्यं प्रति सत्तत्त्वश्रद्धाञ्जलि प्रदानाय परिषदा सर्वकारस्य समक्षं प्रमुखाः याचनाः प्रस्ताविताः

परिषदः पदाधिकारिणः ऊचुः यत् प्रदेशे संस्कृतस्य स्थितिं सुदृढीभूतां कृत्वैव आचार्यवर्यं प्रति सत्या श्रद्धाञ्जलिः अर्पयितुं शक्यते। अस्मिन् विषये परिषदा प्रदेशसर्वकारः शिक्षाविभागश्च निम्नप्रमुखाः याचनाः पूरयितुम् आहूतः:
१.हिमाचलप्रदेशविश्वविद्यालयः संस्कृत-महाविद्यालयानां पाठ्यक्रमं मनसि निधाय स्वकीयेषु नियमेषु संशोधनं कुर्यात् तथा च शास्त्रिच्छात्रेभ्यः सेवारतसंस्कृतशिक्षकेभ्यश्च B.Ed. प्रवेशस्य विशिष्टाम् अर्हतां प्रयच्छेत्।
२. सेवारतशिक्षकेभ्यः शिक्षाविभागेन प्रस्तावितायाः विशेषशिक्षकपात्रतापरीक्षायाः (Special TET) आयोजनं सत्वरं क्रियेत, यस्यां केवलं तेषां सेवावधिरेव प्राथमिकः आधारः स्वीक्रियेत।
३. विद्यालयेषु आचार्यदिवाकरदत्तजयन्त्याः, संस्कृतदिवसस्य, गीताजयन्त्याः, वसन्तपञ्चम्याः, वर्षप्रतिपदः च सदृशानां मुख्यानां सांस्कृतिकपर्वाणाम् आधिकारिकम् आयोजनं सुनिश्चितं भवेत्, येन छात्रेषु भारतीयसंस्काराणां बीजारोपणं सम्भवेत्।
४. हिमाचलसंस्कृताकादम्याः कार्ययोजनायां विद्यालयस्तरीयच्छात्रेभ्यः प्रतियोगिताः वार्षिकदिनदर्शिकायाः (कैलेंडर) नियमितभागः क्रियन्ताम्, येन छात्रेषु संस्कृतं प्रति रुचिः वर्धेत।
५. विद्यालयस्तरे आयोज्यमानानां राज्यस्तरीयसंस्कृतप्रतियोगितानां पुरस्काराणां नामकरणं प्रदेशस्य मूर्धन्यविदुषोः— आचार्यदिवाकरदत्तशर्मणः तथा आचार्यकेशवरामशर्मणः नाम्ना क्रियेत।

## आपद्-त्राणाय सेतु-निर्माण-निगमात् सार्ध-द्विकोटिः

**हिमसंस्कृतवार्ताः राघव नाथ झा**
बिहार-राज्ये आपतितेन आप्लवेन (जलप्लवेन) सन्तप्त-परिवाराणां साहाय्यार्थं बिहार-राज्य-सेतु-निर्माण-निगम-परिमितिना सार्ध-द्विकोटि-रूप्यकाणां (₹२.५० कोटि) तथा बिहार-राज्य-मार्ग-विकास-निगम-परिमितिना द्विकोटि-रूप्यकाणां (₹२.०० कोटि) धनादेशः (चेक) मुख्यमन्त्रि-सहायता-कोषाय मुख्यमन्त्रिणे सम्राट्-चौधरि-महोदयाय समर्पितः।
मुख्यमन्त्रि-सचिवालयस्थे 'संवाद'-कक्षे आयोजिते विशिष्ट-कार्यक्रमे निगम-द्वयस्य प्रतिनिधिभिः आहत्य सार्ध-चतुष्कोटि-रूप्यकाणां (₹४.५० कोटि) साहाय्य-धनादेशः मुख्यमन्त्रिणे समर्पितः। अनेन औदार्यपूर्णेन योगदानेन मुख्यमन्त्री निगम-द्वयस्य प्रति कृतज्ञतां ज्ञापयन् अकथयत् यत् इयं राशिः प्राकृतिक-विपत्तौ सङ्कटग्रस्तानां दीनानां च परिवाराणां सेवायै साहाय्याय च सम्यक् उपयोक्ष्यते। सः न्यवेदयत् यत् समाजस्य संस्थानां च सङ्घबद्ध-सहभागतया एव आपद्-निवारणं पुनर्वास-कार्याणि च प्रभावशालि-रूपेण कर्तुं शक्यन्ते। अस्मिन् अवसरे उपमुख्यमन्त्री विजयकुमार-चौधरी, उपमुख्यमन्त्री बिजेन्द्रप्रसाद-यादवः, मार्ग-निर्माण-विभागस्य सचिवः पङ्कजकुमार-पालः, बिहार-राज्य-सेतु-निर्माण-निगम-परिमितस्य अध्यक्षः धर्मेन्द्रकुमारः, बिहार-राज्य-मार्ग-विकास-निगम-परिमितस्य प्रबन्ध-निदेशकः सौरभ-जोरवाल-महोदयश्च उपस्थिताः आसन्।

# हिन्दी राष्ट्रीयैकतायाः भाषारूपेण विषयकं विशेषव्याख्यानम् सम्पन्नम्



**हिमसंस्कृतवार्ता पटना।**
संस्कृतसंस्कृतिविकाससंस्थानस्य बिहारप्रदेशस्य तत्त्वावधाने हिन्दीमासमहोत्सव–२०२६ इत्यस्य उपलक्ष्ये २८ सितम्बर २०२६ दिनाङ्के सायं ७:३० वादने आभासीयमाध्यमेन 'हिन्दी : राष्ट्रीयैकतायाः भाषा' इति विषयमधिकृत्य विशेषव्याख्यानस्य आयोजनं सम्पन्नम्। कार्यक्रमे विभिन्नविद्वांसः, शिक्षकाः, साहित्यप्रेमिणः तथा हिन्दीभाषानुरागिणः सहभागित्वं कृतवन्तः। कार्यक्रमस्य शुभारम्भः डॉ. ऋषभोपाध्यायेन प्रस्तुतस्य वैदिकमङ्गलाचरणस्य तथा श्री गौतमपराशरेण प्रस्तुतस्य लौकिकमङ्गलाचरणस्य च अभवत्। तत्पश्चात् डॉ. मनीषकुमारझा इत्यनेन स्वागतभाषणं प्रस्तुतं कृत्वा उपस्थितानां अतिथीनां वक्तॄणां सहभागिनां च स्वागतं कृतम्।मुख्यवक्ता डॉ. ललनकुमारः, लक्ष्मीनारायणमहाविद्यालयस्य, भगवानपुरस्य हिन्दीविभागस्य सहायकप्राध्यापकः, 'हिन्दी : राष्ट्रीयैकतायाः भाषा' इति विषये विस्तृतं सारगर्भितं च व्याख्यानं प्रस्तुतवान्। तेन हिन्दीभाषायाः ऐतिहासिकविकासः, सामाजिकविस्तारः, भारतीयजनजीवने च तस्याः भूमिका प्रकाशिता। भारतस्य भाषावैविध्यं सांस्कृतिकसमृद्धेः प्रतीकमिति प्रतिपादयता तेन विभिन्नभारतीयभाषाणां परस्परं सम्मानस्य संवादस्य च आवश्यकता प्रतिपादिता। तेन हिन्दीभाषायाः साहित्यिकवैभवस्य, जनसञ्चारमाध्यमेषु तस्याः भूमिकायाः तथा समकालीनपरिवेशे तस्याः परिवर्तमानस्वरूपस्य च चर्चा कृता। हिन्दीभाषा विभिन्नप्रदेशीयजनानां मध्ये सम्पर्कस्य संवादस्य च महत्त्वपूर्णं माध्यममिति तेन निर्दिष्टम्।विशिष्टातिथिः डॉ. राजेश्वरप्रसादसिंहः हिन्दीभाषायाः राष्ट्रीयसांस्कृतिकमहत्त्वे प्रकाशं नीतवान्। तेन भाषा समाजस्य संस्कृतेश्च मध्ये सेतुरूपेण कार्यं करोतीति प्रतिपादितम्। हिन्दीभाषायाः विकासेन सह भारतस्य अन्यासां भाषाणां प्रति सम्मानस्य समन्वयस्य च भावना आवश्यकेत्यपि तेन प्रतिपादितम्।कार्यक्रमस्य अध्यक्षतां सुप्रसिद्धः कविः लेखकश्च वरिष्ठराजभाषाधिकारी डॉ. बुद्धिनाथमिश्रः अकरोत्। अध्यक्षीयसम्बोधने तेन हिन्दीभाषायाः साहित्यिकसांस्कृतिकसामाजिक-भूमिकायाः उल्लेखः कृतः। भाषां मानवीयसंवेदनानां विचाराणां च आदानप्रदानस्य सशक्तं माध्यममिति प्रतिपादयता तेन समाजे संवादस्य, सौहार्दस्य, परस्परसमझस्य च विकासे भाषायाः महत्त्वं रेखाङ्कितम्।कार्यक्रमस्य अध्यक्षा प्रो. अञ्जू सेठ आसीत्। तस्याः मार्गदर्शने कार्यक्रमस्य आयोजनं सम्पन्नम्। कार्यक्रमस्य सञ्चालनं सुश्री आकाङ्क्षा श्रीः सुव्यवस्थितरूपेण कृतवती। तया कार्यक्रमस्य विभिन्नानां चरणानां सम्यक् समन्वयः कृतः।समापनसत्रे डॉ. वीणामिश्रया धन्यवादज्ञापनं प्रस्तुतम्। तया मुख्यवक्त्रे, विशिष्टातिथये, अध्यक्षायै, मङ्गलाचरणप्रस्तुतकर्तृभ्यः, आयोजकेभ्यः, संचालिकायै तथा सर्वेभ्यः सहभागिभ्यः कृतज्ञता व्यक्ता।अन्ते सर्वैः सहभागिभिः समवेतस्वरेण शान्तिपाठः कृतः। हिन्दीमासमहोत्सवस्य अन्तर्गतं आयोजितं व्याख्यानम् हिन्दीभाषायाः राष्ट्रीयैकतायां, सांस्कृतिकसंवादे सामाजिकसमन्वये च भूमिकां प्रति सार्थकं विमर्शमुपस्थितवत्। आयोजकैः उक्तं यत् भारतीयभाषाणां परस्परं सम्मानं समन्वयश्च देशस्य भाषिकसांस्कृतिकवैविध्यं अधिकं सुदृढं करोति।



# वार्ता-संवादः

**हिमसंस्कृतवार्ताः, ईदरधीररजः**

**नन्दिनी-** नमो वः। अद्यतने वार्ता-कार्यक्रमे स्वागतं व्याहरामि। नमस्ते काव्ये।

**काव्या-** नमस्ते नन्दिनि।

**नन्दिनी-** मया एका विचित्रा वार्ता पठिता। अमेरिकादेशे एकेन अरण्याखुना आपणे मद्यं पीतम्। ततः तेन प्रसुप्तम्।

**काव्या-** अहो, मद्यपः अरण्याखुः! मया अतीव हसितम्। अन्या विचित्रा वार्ता भारते क्रिकेटक्रीडायां दृष्टा। तत्र एकेन दर्शकेन जम्बीरफलं धृतम्। तेन मन्त्राः जपिताः, तदनन्तरं क्रीडकः पराजितः।

**नन्दिनी-** हह, मन्त्रप्रभावः किम्! दक्षिण-आफ्रिकादेशे जनैः एकः विश्वविक्रमः कृतः। सहस्रशः जनैः एकस्मिन् समये भोजनं पक्वम्। तेन सम्पूर्णे आकाशे महान् धूमः प्रसृतः।

**काव्या-** अहो, महान् धूमः! तत् आश्चर्यकरम्। अन्तिम-वार्ता अपि हास्यकरी। बेङ्गलूरु-नगरे एकं मार्ग-चित्रग्राहक-यन्त्रं भ्रान्तम्। एकेन नरेण तन्त्रीवाद्यं नीतम्। यन्त्रेण वाद्याय शिरस्त्राण-अभावात् दण्डः आरोपितः!

**नन्दिनी-** वाद्याय अपि शिरस्त्राणम्! यन्त्राणां बुद्धिः खलु विचित्रा। अद्यतन-कार्यक्रमाय एतावत् एव। धन्यवादः।

# संस्कृताध्ययनकेन्द्रस्य सत्रारम्भकार्यक्रमः एवं दशदिवसीयसंस्कृतसम्भाषणशिविरस्य समपानकार्यक्रमः




**हिमसंस्कृतवार्ता, जगदीशडाभी गुजरातम्।** राजकीय-आयुर्वेदिकमहाविद्यालयपटनायां केन्द्रीयसंस्कृतविश्वविद्यालय-मुक्तस्वाध्यापीठद्वारा समुद्घाटितस्य संस्कृताध्ययनकेन्द्रस्य सत्रारम्भकार्यक्रमस्य उद्घाटनं तथा च दशदिवसीयसंस्कृत-संभाषणशिविरस्य समापनसमारोहः सितम्बरमासस्य अष्टाविंशतितमे दिनाङ्के सुष्ठुतया सम्पन्नः। कार्यक्रमेऽस्मिन् मञ्चे मुख्यातिथिरूपेण विराजमानाः आसान् बिहरप्रान्तस्य संस्कृतभारत्याः सङ्घटनमन्त्रिणः डॉ. श्रवणकुमारमहोदयाः । महाविद्यालयस्य प्राचार्याः प्रो. डॉ. कुमारी उमापाण्डेय-महोदयाः, संहितासिद्धान्त-विभागस्य सहप्राध्यापकाः एवं संस्कृताध्ययनकेन्द्रस्य केन्द्राधिकारिणः डॉ.रोहितरञ्जनमहोदयाः, सं.अ.केन्द्राध्यापकाः अमितझामहोदयाः संहिता-सिद्धान्तविभास्य सहप्राध्यापकाः डॉ.गुरुशरणपाल-महोदयाः, डॉ. आमोदकुमारमहोदयाः, डॉ. कमलेशत्रिपाठीमहोदयाः स्वस्थावृत्तयोगविभागस्य प्राध्यापकः डॉ. गंगाधरसिंहमहोदयाः, अन्ये च विभागीयप्राध्यापकाः छात्राः चासन्। कार्यक्रमेऽस्मिन् महाविद्यालयस्य छात्रैः आदित्य-आदर्श-अभिनव-रूपेश-प्रिंस-ज्योतिकुमार-साक्षी-प्रिया-त्हराफातिमा छात्र-छात्राभिश्च वैद्यरोगीसंभाषणनाटकप्रस्तुतिः कृता। स्नेहातनिष्काप्रिये इति द्वाभ्यां छात्राभ्यां सखीसंवादः कृतः। कार्यक्रमेऽस्मिन् रामसियाकुमारीद्वारा स्वागतगीतं प्रस्तुतम्। संस्कृतकेन्द्राध्यापकेन अमितकुमारझमहोदयेन अस्य कार्यक्रमस्य मञ्चसञ्चालनम् अतिथीनां स्वागतं कृतम्, छात्रछात्राणां नाट्यप्रस्तुतिकाले मञ्चसञ्चालनं ईशातनिष्काभ्यां कृतम् अन्ते च डॉ. आमोदकुमारवर्येणातिथिभ्यः धन्यवादज्ञापनं कृतम्।